शास्त्री II 02-09-2020

अनिवार्यपत्रम् ।
व्याकरणदर्शनञ्च ।

रघुवंशम् । श्लोकव्याख्या ।

"तया स्रजा मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बया सः ।
अमंस्त कण्ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → कविकालिदासः अत्र अजस्य गले इन्दुमत्या समर्पित-
-मालया सह तद् बाहुपाशम् उत्प्रेक्षयति ।

अन्वयः → वरेण्यः सः मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बया
तया स्रजा विदर्भराजावरजां कण्ठार्पितबाहुपाशाम् अमंस्त ।

शब्दार्थः व्याकरणञ्च → वरेण्यः → √वृ + यत् = वरणीयः ।
सः = अजः । मङ्गलपुष्पमय्या → मङ्गलानि च तानि
पुष्पाणि यस्यां सा, तया = शुभसुमनमय्या ।
विशालवक्षःस्थललम्बया → विपुलोरुःस्थलम्बमानया ।
तया स्रजाः = समर्पित मालया । विदर्भराजावरजाम् = इन्दुमतीम् ।
कण्ठार्पितबाहुपाशम् → कण्ठे अर्पितौ बाहुपाशौ यया सा, ताम् =
कण्ठार्पितकराम् । अमंस्त = अनुभूत् ।

तात्पर्यः → अजोऽपि स्वयंवरमालाम् इन्दुमत्याः बाहुपाशम् इव
मत्वा स्वगले सहर्षं धारयामास ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः,
माधुर्यगुणः, उत्प्रेक्षालङ्कारः, उपजातिछन्दश्च ।

[signature] 02-09-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

02-09-2020

संस्कृत सामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । वार्षिक्यां परीक्षायां प्रश्नपत्रस्वरूपम् । सत्र - 2018-2020

सर्वेषां प्रश्नानां उत्तराणि दत्त । प्रश्नस्योपान्ते प्रश्नमानमस्ति ।

1. भूभृत् शब्दस्य तृतीया विभक्तौ, एकवचने रूपम् लिखत । 1 अंक:
पठत् ,, सप्तमी ,, , बहुवचने ,, ,, । 1 अंक:
आत्मन् ,, षष्ठी ,, द्विवचने ,, । 1 अंक:
अष्टन् ,, चतुर्थी ,, एकवचने ,, ,, । 1 अंक:
धीमत् ,, तृतीया ,, ,, ,, । 1 अंक:

2. मम अथवा तव पदस्य रूपसिद्धिं कुरुत । 5 अंका:

3. √अस्, हन्, दा, शक्, ग्रह् धातूनां रूपाणि विभिन्नेषु लकारेषु, पुरुषेषु, वचनेषु वा लिखत । 5 अंका:

4. चिनोति अथवा करोति पदस्य रूपसिद्धिं कुरुत । 5 अंका:

5. सन्धिविच्छेदं कुरुत । 5 अंका:
यद्यपि, सप्तर्षि:, सूर्यास्त:, सदैव, पवन: ।

6. सन्धिं कृत्वा सन्धिनामानि लिखत । 5 अंका: ।
राम + अयनम् । नै + अक: । पितृ + आदेश: ।

7. बहुव्रीहिसमासविधायकं सूत्रं लिखित्वा व्याख्यायत । 5 अंका:

8. समस्तपदस्य विग्रहं कृत्वा समासनामानि लिखत । 5 अंका:
निर्जनम्, व्यर्थ:, अपुत्र:, पितरौ, दन्तोष्ठम् (दन्तौष्ठम्) ।

9. निम्नांकितेन प्रत्ययसहकारेण शब्दनिर्माणं कुरुत । 5 अंका: ।
तव्य, अनीयर्, शतृ, शानच्, ल्यप् ।

10. प्रकृति प्रत्ययनिर्धारणं कुरुत । 5 अंका: ।
गति:, उषित्वा, सेवमान:, गम्य:, कारक: ।

11. तद्धितप्रत्यययोगेन (अण्, त्व, तल्, इञ्, यञ्) शब्दनिर्माणं कुरुत । 5 अंका: ।

12. पाण्डव: अथवा दाशरथि: शब्दस्य रूपसिद्धिं कुरुत । 5 अंका: ।

शिष्टं अपरेद्यु: ।

02-09-2020

डॉ॰ निर्मल कुमार झा (स॰ प्राचार्य:)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ ।

02-09-2020

संस्कृतसामान्यम्। उपशास्त्री।

अनिवार्यपत्रम्। संस्कृतानुवादः।

1. हमलोगों को देखकर वह प्रसन्न हुआ → अस्मान् दृष्ट्वा सः प्रसन्नोऽभवत्।
2. गाँव से आकर किसान ने हाट में एक गाय खरीदी → ग्रामादागत्य कृषकः हट्टे एकां गाम् अक्रीणात्।
3. आचार्य को प्रणाम कर छात्र पढ़ते हैं → आचार्यान् (आचार्यपादान्) प्रणम्य छात्राः पठन्ति।
4. शिवालय में शंकर की पूजा कर भक्त घर गए → शिवालये शंकरं परिपूज्य (पूजयित्वा) भक्ताः गृहमगच्छन्।
5. प्रातःकाल टहलने के लिए लोग उद्यान जाते हैं → प्रातःकाले (प्रातः) भ्रमितुं (भ्रमणाय) जनाः उद्यानं गच्छन्ति।
6. वह कुएँ से जल लाती है → सा कूपात् जलं आनयति।
7. माता पुत्र को दूध पिलाती है → माता पुत्रं दुग्धं पाययति।
8. आचार्य शिष्यों को समझाता है → आचार्यः शिष्यान् बोधयति।
9. माता बच्चे को सुलाती है → माता शिशुं शाययति।
10. श्याम राम को घर जाने के लिए प्रेरित करता है → श्यामः रामं गृहं गमयति (गृहं गन्तुं प्रेरयति)।
11. तुम मुझसे काम करवाते हो → त्वं मां कर्मं कारयसि।
12. √अद्, √भक्ष्, √खाद् धातोः प्रयोगे प्रयोज्यकर्तरि द्वितीया स्थाने तृतीया वि॰ भवति। यथा → माता शिशु को अन्न खिलवाती है → माता शिशुना अन्नं आदयति, भक्षयति, खादयति वा।
13. यजमान ब्राह्मण को भोजन कराता है → यजमानः विप्रं आशयति, भोजयति वा भोजनम्।

जब कर्ता स्वयं कार्य न करके किसी अन्य से कार्य करवाता है तब क्रिया प्रेरणार्थक होती है। ऐसा कर्ता प्रेरक या प्रयोजक होता है, जिससे कार्य करवाया जाता है, वह प्रयोज्य कर्ता होता है। प्रेरणार्थक क्रिया में णिच् प्रत्यय का प्रयोग होता है।

02-09-2020

डॉ॰ निर्मल कुमार झा, (स॰ प्राचार्य)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ।